National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(65): 160-162
© 2026 NJHSR
www.sanskritarticle.com

**सुमन कोइराला**
शोधच्छात्रः , साहित्य विभागः,
सं.वि.ध.वि., काशी हिन्दू विश्वविद्यालय,
वाराणसी

**Correspondence:**
**सुमन कोइराला**
शोधच्छात्रः , साहित्य विभागः,
सं.वि.ध.वि., काशी हिन्दू विश्वविद्यालय,
वाराणसी

# अलङ्कारेषु व्याकरणसिद्धान्ता:

**सुमन कोइराला**

**शोधसारः-**

"अलङ्कार:" स्वयमेव स्वनाम्नि स्वं गाम्भीर्यं धारयति। अस्मिन्श्च विषये बहुभिराचार्यैः विचारो विहितो वर्तते। तत्र काव्यशास्त्रनिकायेऽस्य महती चर्चा विद्वद्भिः कृता। अयं विषय: महान् इत्यत अस्मिन् विषये बहूनां शास्त्राणां सिद्धान्त: दरीदृश्यते। तेष्वपि व्याकरण सिद्धान्त: अधिकतया पर्यालोच्यते। यतोहि व्याकरणमस्त्येव तादृशो विषय: यस्य प्रभाव शास्त्रजगति क्व न लभ्येत। तेष्वलङ्कारेषु व्याकरणसिद्धान्तेनाप्लावितानामलङ्काराणां चर्चात्र मया प्रस्तूयते संक्षेपेण यस्य लाभ: सर्वेषां शास्त्रानुरागीणां स्यादेव।

**विषय प्रवेश:-**

अलङ्कारः- शब्दस्य व्युत्पत्ति:अलङ्करोतीति भवति। अलमिति पूर्वकात् डुकृञकरणे इत्यस्मात् धातो: भावे घप्रत्यये कृते निष्पद्यते। अस्यार्था: भूषणम् आभरणम्

परिष्कार: इत्यादय: बहवो भवन्ति। तत्र शब्दरत्नावल्यामलङ्क्रिया, भूषा अलङ्कारणमित्यपि प्रदत्तम्। यथा मनुष्याणां शरीरे अलङ्कार: स्वं महत्वं स्थापयति तथैव शास्त्रोपि।

उक्तञ्च काव्यप्रकारकारेणाचार्येण मम्मटेन –

**उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।**
**हारादिवदलङ्कारास्तेऽनुप्रासोपमादय:।।**[1]

अयञ्चालङ्कार: काव्यशास्त्रस्योत्कर्षाधायको भवति। काव्यशास्त्रमुपकरोति। परन्तु सदैवोत्कर्षं धारयति इत्यपि न। अतएव अयमस्थिरो धर्मो भवति काव्यस्य अत एव साहित्यदर्पणकार: कविराज: विश्वनाथ: अलङ्कार: लक्षणं लिलेख यत्

**शब्दार्थयोरस्थिरा: ये धर्माश्शोभातिशायिन:।**
**रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत् ।।**[2]

परन्तु, सिद्धान्तोऽयं न सर्वमान्य:, ध्वनिवादीनामेव। अलङ्कारसम्प्रदायस्तु काव्यस्यापरिहार्यं स्थिरतत्वं मनुते। अस्य मते अलङ्काररहितं काव्यं शशश्रृङ्गवत् अलिकं प्रतिभाति। इतोऽपि निगदति सम्प्रदायोऽयं यथोष्णतारदितस्य वह्ने: कल्पनोपहासयोऽयं तथैवालङ्काररदितस्य काव्यस्यापि। इममे भावं द्योतयन् जयदेव: स्वग्रन्थे चन्द्रालोकेऽलिखत् –

**अङ्गीकरोति य: काव्यं शब्दार्थावनलङ्कृती।**
**असौ न मन्यते कस्मात् अनुष्णमनलं कृती।।**[3]

जयदेव: मम्मटं प्रश्नयति यद् उष्णताविहिनं वह्निं कथं नाङ्करोति? अलङ्कारविषये बहुभिराचार्यैः बहुत्र बहुधा विस्तृत रुपेण चर्चा कृतेत्यत: तस्मिन् विषयेऽस्माभि: नाधिकं कथ्यते। साक्षात् शोधविषये एवोच्यते। सन्ति बहव: अलङ्कारा: ये व्याकरणशास्त्रमाधारीकृत्य स्वविभागं कल्पयन्ति। तेषु केषाञ्चिदलङ्काराणां विषयेऽत्र विचार: प्रस्तूयते।

**उपमा**

अयमलङ्कार: अलङ्कारेषु सर्वप्रथमं स्थानं महत्वञ्च विभर्ति। तत्र सर्वैराचार्यैः अस्य प्रशंसा मुक्तकण्ठेन विदिता वर्तते। सर्वत्रापि ग्रन्थेष्वयमेव प्रथम: निरुपित: । निरूपणे हेतुश्च प्रदर्शितराचार्यैः। लिखति टीकाकार: भट्टवामन: **अनेकालङ्कारमूलभूतत्वात्सौ-कुमार्याधितिशयानश्च प्रधानमुपमां लक्षयतीति।**[4]

आचार्यमहिमभट्टोऽपि कथयति – **सर्वेष्वलङ्कारेषु जीवितायते।** अलङ्कारेषु प्राणभूतोऽ्यंमलङ्कार: ।

आचार्यमहर्षिपाणिनि: उपमां विधिवत् निकूपयामास अस्मिन्न-लङ्कारे समागतानामुपयोगिभूतानां सर्वेषां शब्दानां विषये स्वग्रन्थे अष्टाध्याय्यां अनेकत्र अनेकेषु सूत्रेषु विस्तृत चर्चामकरोत। यथा, उपमानम्, उपमेय: इत्यादिनां विषये शास्त्रीयविवेचनं विहितम्। अनेनाचार्येण उपमानम्, उपमितम् सामान्यम्, उपमा इत्यनेन सह औपन्यम्, उपमार्ध: साहश्यम् इत्यादिनां शब्दानामपि प्रयोग: कृत: । इतोऽपि वयं तत्रावलोकयामश्चेत् तेषु तेषु प्रकारणेषु स्पष्ट: प्रतिपत्तिर्जायते। तत्र कृत् तद्धितै: समासान्तप्रत्ययं समासविधायकं तथा से स्वरप्रक्रियाञ्च दृश्यते चेत् इतोऽपि स्पष्टं भविष्यति। पाणिने: इदमेव समस्तवर्णनस्वरूपं साहित्यिकानां कृते आधारस्तम्भो भवति। एनमेवाधारी कृत्य तै: विभाग: विभज्यते। उभयत्र कश्चन भेद: अवश्यमनुभूयते। महर्षि पाणिनि: सामान्यवाक्येऽपि यथा – गौरिव गवय: इत्यादिषु उपमाया: स्थितमङ्गीकरोति । परन्तु काव्यशास्त्रिण काव्यबन्ध एव।

उपमालङ्कारप्रयोजकी भूता: केचन पदार्था: भवति। यथा – उपमेय,उपमानम्, साधारण धर्म:, साधारणधर्मवाचकशब्द: एतेषामपि चर्चा व्याकरणशास्त्रे सुलभतया लभ्यते। तत्र पाणिनिसूत्रेषु उपमानानि सामान्यवचनै: इत्यत्र निरुपितं वर्तते। यद्यपि पाणिनिना प्रकृतसूत्रे पारिभाषिकशब्द: प्रयुक्त:। अपरञ्च उपमानानि सामान्यवचनै: इत्यस्मिन् सूत्रेऽपि दृश्यते। प्रायः उपमाया: ये शब्दा: काव्यक्षेत्रे दृश्यन्ते ते प्रायः समेऽपि व्याकरणसिद्धान्तान् आधारीकृत्यैव सन्ति इत्यत्र नकाचिदतिशयोक्ति: अयमलङ्कार: महान्तं प्रपञ्चं भजत इत्यत: अश्चिका चर्चा नैवात्र विधीयते।

**उत्प्रेक्षा**

अयमलङ्कारोऽपि व्याकरणशास्त्रप्रभाविता: परिलक्ष्येता प्रायः अतिशयोक्ति न भवेत् यद् व्याकरणशास्त्रेण प्रभावितं किमपि शास्त्रं न स्याद्। यस्मिन् कस्मिन्नपि विषये व्याकरणं प्रविष्टं भवत्येव तत्रमार्ग: भिन्नप्रकारै: किं वा भवेद्। अस्मिन्नलङ्कारेऽपि केश्चन व्याकरण-सिद्धान्ता: अनुभूयते। प्रायः इवशब्दार्थविषये। अयमलङ्कारोऽपि इवशब्दमेव विषयीकरोति। अतः तत्र इवशब्दार्थस्य कुत्रान्वये अयमलङ्कार इति भवति। सङ्क्षेपेणालङ्कारस्वरूपं प्रस्तूयते। तत्र काव्यप्रकारा: मम्मट: लिखति यद्

**'सम्भावनमद्योत्प्रेक्षा प्रकृतस्य समेनयत्।**[5]

समेन, उपमानेन प्रकृतस्य वण्योर्पमेयस्य सम्भावनम, उत्कटैक-कोटिकसन्देह उत्प्रेक्षा भवति इतोऽपि स्पष्टं पूरभश्चेद यत्र उपमेयस्योपमानेन सहोत्कटैककोटिकसन्देहो जायते तत्रोत्प्रैक्षा-लङ्कारो भवति। अयमपि अलङ्कार: सादृश्यमूलक एव वर्तते। अत्रापि विषयो यथा उपमायाम अनन्वये उपमेयोपमायां वर्तते। स एव तथापि एतेषां परस्परं भेदो दृश्यते।

**विरोध**:

यद्यपि द्वयो: पदार्थयो: परस्परं विरोधाभावेऽपि विरुद्धधत्वे-नाभिधानं विरोधालङ्कारस्वरूपम्। ननु विरोधाभावे विरोधस्य प्रतीति: कथम् इति चेद् विरुद्धार्थप्रतिपादकपदानामन्यार्थपरकत्वात। अविरोधेऽपि आपातत: विरोधाभास:। अस्मिन्नलङ्कारे काव्यकारै: महाभाष्य- भिप्रेत: जाति:, गुण:, क्रिया द्रव्याञ्चाधारीकृत्या-स्यालङ्कारस्य दशभेदा: प्रतिपादिता: ।

यथा-

**जातिश्चतुभिर्जात्याद्यैर्विरुद्धा स्याद्गुणास्त्रिभि:**
**क्रिया द्वाभ्यामपि द्रव्यं द्रव्यैणैवेति ते दश।।**[6]

अस्मिंश्च भेदे वैयाकरणानां प्रभावै: स्पष्टं दृश्यते।

**" स्वभावोक्ति"**

जातिगुणक्रियाद्रव्यरुपपदार्थानामवस्थाविशेषाद उत्पन्नस्वरूपस्य कथनं स्वभावोक्ति: ।

**नानावस्थं पदार्थानां रूपं साक्षाद्विवृण्वती**
**स्वभावोक्तिश्च जातिश्चेन्याद्या सालङ्कृतिर्यथा।**[7]

**"विभावना"**

यत्र कारणं विना कार्योत्पत्ति: सा विभावना।

**"विभावना विना हेतुं कार्योत्पत्तिर्दृश्यते।।**

**क्रियायाः प्रतिषेधेऽपि फलव्यक्तिर्विभावना।**

अत्र क्रियाशब्देन व्याकरणनिकाये प्रसिद्धं हेतुः स्वीक्रियते। पाणिनिना, **शब्दवैरकलहाभ्रकण्डमेघेभ्य**: करणे (पा 2० 3.17) इत्यस्मिन् सूत्रे प्रतिपादितम्। करणशब्दः क्रियापर्यायवाच्येव। क्रियते अनया इति क्रिया व्युत्पत्यनया। अत अयमेव व्याकरण-सिद्धान्तयुक्तोऽलङ्कारः परिसंख्या, असङ्गतिश्च व्याकरणसिद्धान्तेन परिसिञ्चितोऽलङ्कारः।

यद्यपि बहवः विषयाः सन्ति अलङ्कारविषये तथापि विस्तर भयात् विरम्यते।

**सन्दर्भग्रन्थसूचिः**

[1].काव्यप्रकाशः, सूत्रसंख्या 86

[2].साहित्यदर्पणम्

[3].चन्द्रालोकः

[4].काव्यप्रकाशः

[5],अलङ्कारसर्वस्वः

[6].काव्यादर्शः

[7].साहित्यदर्पणम्